निर्वेवमाणस्य समेत्य रक्तं
दोषास्त्वचं पाण्डरतां नयन्ति ॥ * ॥
तस्य पूर्व्वरूपाणि यथा,—
त्वक्स्फोटनष्ठीवनगात्रसाद-
मृद्भक्षणप्रेक्षणकूटशोथाः ।
विण्मूत्रपीतत्वमथाविपाको
भविष्यतस्तस्य पुरःसराणि ॥ * ॥
वातिकस्य तस्य लक्षणं यथा,—
त्वङ्मूत्रनयनादीनां रूक्षकृष्णारुणाभता ।
वातपाण्ड्वामये कम्पतोदानाहभ्रमादयः ॥ * ॥
पैत्तिकस्य लक्षणं यथा,—
पीतमूत्रशकृन्नेत्रो दाहतृष्णाज्वरान्वितः ।
भिन्नविट्कोऽतिपीताभः पित्तपाण्ड्वामयी नरः ॥
श्लैष्मिकस्य लक्षणं यथा,—
कफप्रसेकश्वयथुतन्द्रालस्यातिगौरवैः ।
पाण्डुरोगी कफाच्छुक्लैस्त्वङ्मूत्रनयनाननैः ॥ * ॥
त्रिदोषजस्य लक्षणं यथा,—
ज्वरारोचकहृल्लासच्छर्द्दितृष्णाक्लमान्वितः ।
पाण्डुरोगी त्रिभिर्दोषैस्त्याज्यः क्षीणो हतेन्द्रियः ॥
मृज्जस्य संप्राप्तिर्यथा,—
मृत्तिकादनशीलस्य कुप्यत्यन्यतमो मलः ।
कषाया मारुतं पित्तमूषरा मधुरा कफम् ॥
कोपयेन्मृद्रसादींश्च रौक्ष्याद्भुक्तञ्च रूक्षयेत् ।
पूरयत्यविपक्वैव स्रोतांसि विरुणद्ध्यपि ॥
इन्द्रियाणां बलं हत्वा तेजो वीर्य्यौजसी तथा ।
पाण्डुरोगं करोत्याशु बलवर्णाग्निनाशनम् ॥ * ॥
मृत्तिकाभक्षणजन्यपाण्डुलक्षणं यथा,—
मृद्भक्षणाद्भवेत् पाण्डुस्तन्द्रालस्यनिपीड़ितः ।
सकासश्वासशूलार्त्तःसदारुचिसमन्वितः ॥
शूनाक्षिकूटगण्डभ्रूः शूनपान्नाभिमेहनः ।
क्रिमिकोष्ठोऽतिसार्य्येत मलं सासृक्कफान्वितम् ॥
तस्य असाध्यलक्षणं यथा,—
ज्वरारोचकहृल्लासच्छर्द्दितृष्णाक्लमान्वितः ।
पाण्डुरोगी त्रिभिर्दोषैस्त्याज्यः क्षीणो हतेन्द्रियः ॥
पाण्डुरोगश्चिरोत्पन्नः खरीभूतो न सिध्यति ।
कालप्रकर्षाच्छूनानां यो वा पीतानि पश्यति ॥
बद्धाल्पविट् सहरितं सकफं योऽतिसार्य्यते ।
दीनः श्वेतातिदिग्धाङ्गश्छर्द्दिमूर्च्छातृषान्वितः ॥
स नास्त्यसृक्क्षयाद्यश्च पाण्डुः श्वेतत्वमाप्नुयात् ॥
पाण्डुदन्तनखो यस्तु पाण्डुनेत्रश्च यो भवेत् ।
पाण्डुसंघातदर्शी च पाण्डुरोगी विनश्यति ॥
अन्तेषु शूनं परिहीनमध्यं
म्लानं तथान्तेषु च मध्यशूनम् ।
गुदे च शेफस्यथ मुष्कयोश्च
शूनं प्रताम्यन्तमसंज्ञकल्पम् ॥
विवर्ज्जयेत् पाण्डुकिनं यशोऽर्थी
तथातिसारज्वरपीड़ितञ्च ॥"
इति माधवकरः ॥
( यथा च,—
"पित्तप्रधानाः कुपिता यथोक्तैः कोपनैर्मलाः ।
तत्रानिलेन बलिना क्षिप्तं पित्तं हृदि स्थितम् ॥
धमनीर्दश सम्प्राप्य व्याप्नुवत् सकलां तनुम् ।
श्लेष्मत्वग्रक्तमांसानि प्रदूष्यान्तरमाश्रितम् ॥
त्वङ्मांसयोस्तत् कुरुते त्वचि वर्णान् पृथग्-
विधान् ।
पाण्डुहारिद्रहरितान् पाण्डुत्वं तेषु चाधिकम् ॥
यतोऽतः पाण्डुरित्युक्तः स रोगस्तेन गौरवम् ॥
धातूनां स्याच्च शैथिल्यमोजसश्च गुणक्षयः ॥
ततोऽल्परक्तमेदस्को निःसारः स्यात् शथेन्द्रियः ।
मृद्यमानैरिवाङ्गैर्ना द्रवता हृदये न च ॥
शूनाक्षिकूटसदनः कोपनः ष्ठीवनोऽल्पवाक् ।
अन्नद्विट् शिशिरद्वेषी शीर्णरोमा हतानलः ॥
सन्नसक्थी ज्वरी श्वासी कर्णक्ष्वेड़ी भ्रमी श्रमी ।
स पञ्चधा पृथग्दोषैः समस्तैर्मृत्तिकादनात् ॥
प्राग्रूपमस्य हृदयस्पन्दनं रूक्षता त्वचि ।
अरुचिः पीतमूत्रत्वं स्वेदाभावोऽल्पवह्निता ॥
सादः श्रमोऽनिलात्तत्र गात्ररुक्तोदकम्पनम् ।
कृष्णरूक्षारुणसिरानखविण्मूत्रनेत्रता ॥
शोफानाहास्यवैरस्यविट्शोषाः पार्श्वमूर्द्धरुक् ।
पित्ताद्धरितपीताभसिरादित्वं ज्वरस्तमः ॥
तृट्स्वेदमूर्च्छाशीतेच्छादौर्गन्ध्यं कटुवक्त्रता ।
वर्च्चोभेदोऽम्लको दाहः कफात् शुक्लसिरादिता ॥
तन्द्रालवणवक्त्रत्वं रोमहर्षः स्वरक्षयः ।
कासः च्छर्द्दिश्च निचयाच्चिश्रलिङ्गोऽतिदुःसहः ॥
मृत्कषायानिलं पित्तमूषरा मधुराकफम् ।
दूषयित्वा रसादींश्च रौक्ष्याद्भुक्तं विरूक्ष्य च ॥
स्रोतांस्यपक्वैवापूर्य्य कुर्य्याद्रुद्ध्वा च पूर्ब्बवत् ।
पाण्डुरोगं ततः शूननाभिपादास्यमेहनः ॥
पुरीषं क्रिमिमन्मुञ्चेद्भिन्नं सासृक्कफं नरः ॥"
इति वाभटे निदानस्थाने । १३ । १—१३ ॥)
तस्यौषधं यथा,—
"लोहचूर्णं तक्रपीतं पाण्डुरोगहरं भवेत् ॥"
इति गारुड़े १८० अध्यायः ॥
अपि च ।
"सप्तरात्रं गवां मूत्रे भावितं चायसो रजः ।
पाण्डुरोगप्रशान्त्यर्थं पयसा प्रपिबेन्नरः ॥ १ ॥
गोमूत्रसिद्धं मण्डूरचूर्णं सगुड़मश्नतः ।
पाण्डुरोगः क्षयं याति पङ्क्तिशूलञ्च दारुणम् ॥ २
अयोमलं सुसन्तप्तं भूयो गोमूत्रसाधितम् ।
मधुसर्पिर्युतं लीढ्वा पाण्डुरोगी सुखी भवेत् ॥ ३ ॥
पुनर्नवात्रिवृद्व्योषविड़ङ्गं दारु चित्रकम् ।
कुष्ठं हरिद्रे त्रिफला दन्ती चव्यं कलिङ्गकम् ॥
कटुका पिप्पलीमूलं मुस्तं शृङ्गी च कारवी ।
यमानी कट्फलश्चेति पृथक्पलमितं मतम् ॥" ४ ॥
इति भावप्रकाशः ॥ * ॥
( अस्य सकारणलक्षणचिकित्सादीनि यथा,—
"शृणु पुत्त्र ! प्रवक्ष्यामि पाण्डुरोगं महागदम् ।
पञ्चैव पाण्डुरोगास्ते सम्भवन्तीह मानुषे ॥
वातिकः पैत्तिकश्चैव श्लैष्मिकः सान्निपातिकः ।
पञ्चमो रूक्षणः प्रोक्तो वक्ष्ये चैषान्तु सम्भवम् ॥
दीर्घाध्वना पीड़ितो वा ज्वरेण
रक्तस्रावो पीड़ितो वा व्रणेन ।
चिन्तायासाद्रोषणाद्वै मनुष्य
क्षायं पाण्डुर्जायते सेवते यः ॥
क्षारस्याम्लं कल्यमैरेयसेवा
अव्यायामात्मैथुनातिश्रमेण ।
निद्रानाशो नातिनिद्रा दिवापि
योगेष्वेतैर्मृत्तिकाभक्षणेन ॥
अतिशिथिलशरीरे रोगसम्पीड़िते वा
लवणकटुकषाया सेवनात्वैन मृद्भिः ।
अतिसुरतमजस्रं सेवनातिक्रमेण
नयति रुधिरशोषं तेन वै पाण्डुरोगम् ॥
तेनाक्षिकूटे श्वयथुः शरीरे
पाण्डुत्वमायाति सपीतमूत्रः ।
निष्ठीवते त्वक् प्रविदीर्य्यते च
संजायते तस्य पुरःसराणि ॥
तोदः परुषत्वशिरोगुरुत्वं
त्वङ्मूत्रनेत्रे नखकालिमा स्यात् ।
वातात्मकं तन्मनुजस्य विद्धि
लिङ्गैरुपेतोऽनिलपाण्डुरोगः ॥
आमत्वपीतत्वकरो हि लोके
बिभर्त्ति शोषं कटुकास्यता च ।
मन्दज्वरो वै भृशशोषमोहः
पीतच्छविः पीतभवो हि पाण्डुः ॥
तन्द्रालुताशोफकफेन युक्तः
आलस्यकस्वेदगुरुत्वमेव ।
संजायते तस्य कफात्मकोऽसौ
नरस्य पाण्डुत्वभवो विकारः ॥
तन्द्रालस्यं श्वयथुवमथू कासहृल्लासशोषा
विड्भेदः स्यात् परुषनयने सज्वरो वै क्षुधार्त्तः ।
मोहस्तृष्णाक्लममथ मनुजस्याशु पश्येत् सुदूर
त्याज्यो वैद्यैर्निपुणमतिभिः सन्निपातोत्थपाण्डुः ॥
मृत्तिकाभक्षणेनाथ शृणु पुत्त्र ! गदो महान् ।
पाण्डुरोगो गरिष्ठोऽपि भवेद्धातुक्षयङ्करः ॥
मृद्भक्षणाच्चैव मलं प्रकीर्य्य
स्रोतांसि रुन्धन्ति च मृत्तिकायाः ।
तेनैव नासृक् परिवर्त्तयन्ति
न तर्पयन्ते वपुषं रसेन ॥
क्षारात् कषायान्मधुरस्य पानात्
स कोपयत्याशु नरस्य मृत्स्ना ।
श्लेष्मप्रकोपान्मधुरान् करोति
मृत्स्ना न जग्धा हितकारिणी स्यात् ॥
विकृतिमुपगतास्ते मारुताद्यास्त्रयस्तु
बलवदनरुक्षीणां नाशयन्त्याशु दोषाः ।
भवति विकलमेवं पाण्डुरोगे शरीरं
भवति जठरपाण्डू रोग आशुप्रवीण ॥"
"गोमूत्रमध्ये मतिमान् स्नापयेत् सप्तरात्रि-
कम् ।
तस्मात् चूर्णन्तु मधुना देयं पाण्ड्वामयापहम् ॥
त्र्यूषणं त्रिफला मुस्ता विड़ङ्गं चित्रकं
समम् ।
भागमेकं लौहचूर्णमिक्षुद्रावे विभावयेत् ॥
सप्ताहमथ लोहखल्लितं
पुनरपि ध्रुवं प्रवरं स्यात् ।
शीलितन्तु मधुनापि घृतेन
पाण्डुरोगहृदयामयापहम् ॥